सिद्धांत [illegible] कौमुदी सारसंग्रहः

१०३

९६ पत्राणि

८

सीधांतसारकौमुदी





॥सिद्धातसार[illegible]॥



श्री

सि॰ सा॰ ...णेशायनमः॥ ॥ब्रह्मविष्णुशिवान्नत्वा पाणिन्यादिमुनींस्तथा। सिद्धांतकौमुदीसारसंग्रहः। क्रियते मया ब्रह्मविष्णुशि

वान्नत्वा पाणिनादिमुनीस्तथा। सिद्धांतकौमुदीसारसंग्रहः क्रियते मया॥१॥ अइउण्॥ ऋलृक्। एओङ्। ऐऔच्।

१ हयवरट्। लण्। ञमङणनम्। झभञ्। घढधष्। जबगडदश्। खफछठथचटतव्। कपय्। शषसर्। हल्। इति प्रत्या

हारसूत्राणि। उपदेशेजनुनासिक इत्। उपदेशेनुनासिकोजित्संज्ञः स्यात्। हलंत्यं। उपदेशेंत्यं हलित्स्यात्। तस्य लोपः।

आदिरंत्येन सहेता। अंत्येनेतासहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्। तथाहि। अण् अकारादीनां वानां सं[illegible]

क् इकारादीनां चतुर्णां संज्ञा। एच् एकारादीनां चतुर्णां संज्ञा। एवमन्या अपि। लण्सूत्रस्थाकारो वर्णेन सहोच्चार्यमाणो रेफो रल

योः संज्ञा। ऊकालोज्झ्रस्वदीर्घप्लुतः। ऊ ऊ ऊ३ इत्येवंकालो यस्य क्रमात् ह्रस्वदीर्घप्लुतसंज्ञः स्यात्। उच्चैरुदात्तः। नीचैरनुदात्तः।

समाहारः स्वरितः। मुखनासिकावचनोनुनासिकः। मुखसहितनासिकयोच्चार्यमाणोनुनासिकसंज्ञः स्यात्। तुल्यास्यप्रय राम

त्नं सवर्णं। तुल्यौ स्थानप्रयत्नौ ययोस्ते परस्परसवर्णसंज्ञौ स्तः। नाज्झलौ। तुल्यास्यप्रयत्नावप्यज्झलौ न सवर्णौ स्तः। अकुहविस १

र्जनीयानां कंठः। इचुयशानां तालु। ऋटुरषाणां मूर्द्धा। लृतुलसानां दंताः। उपूपध्मानीयानामोष्ठौ। जमङणनानां नासि

कावा। एदैतोः कंठतालु ओदौतोः कंठोष्ठं। वकारस्य दंतोष्ठं॥ जिह्वामूलीयस्य जिह्वामूलं। नासिकानुस्वारस्य। स्पृष्टः प्रय
त्नः स्पर्शानां। ईषत्स्पृष्टमंतस्थानां॥ विवृतमूष्मणां स्वराणां च। खरामघोषो विवारः श्वासश्च। हशां घोषः संवारो नादश्च। व
र्गाणां प्रथमतृतीयपंचमा यरलवाश्चाल्पप्राणाः॥ द्वितीयचतुर्थाः शषसहाश्च महाप्राणाः। कादयो मावसानाः स्पर्शाः।
यरलवा अंतस्थाः। शषसहा ऊष्माणः। कइति जिह्वामूलीयः। पइत्युपध्मानीयः। ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यं। अणु
दित्सवर्णस्य चाप्रत्ययः। अविधीयमानोऽण् उदिच्च सवर्णस्य संज्ञा स्यात्। अत्राण् परेण णकारेण। तपरस्तत्कालस्य। तः
परो यस्मात्स च तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात्। वृद्धिरादैच्। आदैच्च वृद्धिसंज्ञः स्यात्। अदेङ् गुणः। अदे
ङ् गुणसंज्ञः स्यात्। भूवादयो धातवः। क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः। चादयोऽसत्त्वे। अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः॥
प्रादयः। अद्रव्यार्थाः प्रादयस्तथा। उपसर्गाः क्रियायोगे। गतिश्च। प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः। प्र। परा। अ
प। सं। अनु। अव। निस्। निर्। दुस्। दुर्। वि। आङ्। नि। अधि। अपि। अति। सु। उत्। अभि। प्रति। परि। उप। एते प्रादयः। वि
रामोऽवसानं। वर्णानामभावोऽवसानसंज्ञः स्यात्। सुप्तिङंतं पदं। सुबंतं तिङंतं च पदसंज्ञं स्यात्। हलोऽनंतराः संयोगः। अज्भिरव्यव

हिता हलः संयोगसंज्ञाः स्युः। इति संज्ञाप्रकरणं। इको गुणवृद्धी। गुणवृद्धी स्वसंज्ञया विधीयमाने इक एव स्थाने स्तः। अचश्च।
ह्रस्वादिसंज्ञया विधीयमानोऽच् अच एव स्थाने स्यात्। आद्यंतौ टकितौ। टित्कितौ यस्योक्तौ तस्य क्रमादाद्यंतावयवौ स्तः। मिदचोंत्या
त्परः। अंत्यादचः परो मित्स्यात्। स्थानेऽन्तरतमः। स्थाने प्राप्यमाणानां मध्ये सदृशतम आदेशः स्यात्। अलोऽन्त्यस्य। षष्ठी
निर्दिष्टोंत्यस्यादेशः स्यात्। ङिच्च। अयमप्यंत्यस्ये स्यात्। सर्वस्येत्यस्यापवादः। आदेः परस्य। परस्य यद्विहितं तत्तस्यादेर्बोध्यं। अलो
ऽन्त्यस्यापवादः। अनेकाल्शित्सर्वस्य। अलोऽन्त्यस्यापवादः। इति परिभाषा। इको यणचि। इकः स्थाने यण् स्यादचि। सुधी उपास्य
इति स्थिते स्थानत आंतर्यादीकारस्य यकारः। सुध् य् इति स्थिते। अनचि च। अचः परस्य यरो द्वे वा स्तो न त्वचि। इति धकारस्य द्वि
त्वं। झलां जश् झशि। इति पूर्वधकारस्य दकारः। सुद्ध्युपास्यः। मद्ध्वरिः। धात्त्रंशः। लाकृतिः। अचो रहाभ्यां द्वे। अचः पराभ्यां रेफह
काराभ्यां परस्य यरो द्वे वा स्तः। हर्य्यनुभवः। न ह्यस्ति। एचोऽयवायावः। एचः क्रमात् अय् अव् आय् आव् एते स्युरचि। हरये। वि
ष्णवे। नायकः। पावकः। लोपः शाकल्यस्य। अवर्णपूर्वयोः पदांतयोर्यवयोर्वा लोपोऽशि परे। पूर्वत्रासिद्धं। सपादसप्ताध्यायीं प्र
ति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धमिति लोपस्यासिद्धत्वान्न स्वरसंधिः। हर एहि। हरयेहि। विष्ण इह। विष्ण

विहा। आ ऋगुणः। अवर्णादिवि ऊर्व परयो रेकोगुणादेशः स्यात्। उपेंद्रः। गंगोदकं। उ रणपरः। अ ऋकाने योरणसरपरः सन्नेव
प्रवर्तते कृष्णऋद्धिरित्यत्रान्। तवल्कार इत्यत्राल्। कृष्णर्द्धिः। तवल्कारः। वृद्धिरैऔ। आदेचि परे वृद्धिरेकादेशः स्यात्। गुणाप
वादः। कृष्णैकत्वं। गंगौघः। देवैश्वर्यं। कृष्णौत्कंठं। अचोंत्यादि टि। अंत्याच् प्रभृति शब्दष्टिसंज्ञः स्यात्। शकंध्वादिषु पररूपं वा
च्यं। तच्च टेः। शकंधुः। कर्कंधुः। कुलटा। सीमंतः। केशवेशः। शो सीमांतो न्यः। मनीषा। लांगलीषा। पतंजलिः। सारंगः। अकः सव
र्णे दीर्घः। अकः सवर्णे चि दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। होतृकारः। एङः पदांतादति। पदांतादेङोतिप द्वि
रे पूर्वरूपमेकादेशः स्यात्। हरेव। विष्णोव। अथ प्रकृतिभावः। दूराद्धूते च। दूरात् संबोधने वाक्यस्य टेः प्लुतः स्यात्। ईदूदेद्द्विवच
नं प्रगृह्यं। ईदूदेदंतं द्विवचनं प्रगृह्यसंज्ञं स्यात्। प्लुतप्रगृह्या अचि। प्लुताः प्रगृह्याश्चाचि प्रकृत्या स्युः। एहि कृष्ण ३ अत्र गौश्च
रति। हरी एतौ। विष्णू इमौ। गंगे अमू। अदसो मात्। अदसो मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशाः। अमू आसाते। इत्यच्सं
धिः। अथ हल्संधिः। स्तोः श्चुना श्चुः। सकारतवर्गयोः। शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः। हरिश्शेते। रामश्चिनोति। स
च्चित्। शार्ङ्गिञ्जय। शात्। शात्परस्य तवर्गस्य चुत्वं न स्यात्। विश्नः। प्रश्नः। ष्टुना ष्टुः। स्तोः ष्टुना योगे ष्टुः स्यात्। रामष्षष्ठः। रा

सि·को·सं
२
3

मष्टीकते। पेष्टा। तट्टीकते। चक्रिण्टोकसे। नपदांताट्टोरनाम्। पदांताट्टवर्गान्यरस्य स्तोः ष्टुर्नस्यात्। षट्संतः। षट्ते। अना
म्नवतिनगरीणामितिवाच्यं। षण्णां। षण्णवतिः। षण्णगर्य्यः। तोःषि। तवर्गस्य षकारे परे न ष्टुत्वं। सन्षष्ठः। झलां जशोंऽते। पदांतस्यो
ऽनुनासिके परेऽनुनासिको वा स्यात्। एतन्मुरारिः। एतद्मुरारिः। प्रत्यये भाषायां नित्यं। चिन्मात्रं। चिन्मयं। तोर्लि। तवर्गस्य लकारे
परे परसवर्णः स्यात्। तल्लयः। विद्वांल्लिखति। नकारस्यानुनासिको लकारः। झयो होऽन्यतरस्यां। झयः परस्य हस्य पूर्वसव
र्णो वा स्यात्। घोषवतो नादवतो महाप्राणस्य संवृतकंठस्य हस्य तादृशो वर्गचतुर्थ एवादेशः। वाग्घरिः। वाग्हरिः। शश्छोऽटि।
झयः परस्य शस्य छो वा स्यादटि। दस्य चुत्वेन जकारे कृते। खरि च। खरि झलां चरः स्युः। इति जकारस्य चकारः। तच्छिवः। त
च्शिवः। मोऽनुस्वारः। मांतस्य पदस्यानुस्वारः स्याद्धलि। अलोंत्यस्य। हरिं वंदे। नश्चापदांतस्य झलि। नस्य मस्य चापदांतस्य झ
ल्यनुस्वारः स्यात्। यशांसि। आक्रंस्यते। अनुस्वारस्य ययि परसवर्णः। अनुस्वारस्य परसवर्णः स्याद्ययि। अङ्कितः। कुण्ठितः। राम
ङः सि धुट्। ङात्परस्य सस्य धुड्वा स्यात्। षट्त्संतः। षट्संतः। नश्च। नकारांतात्परस्य सस्य धुड्वा स्यात्। सन्त्सः। सन्सः। ङमो ह्र २
स्वादचि ङमुण्नित्यं। ह्रस्वात्। ह्रस्वात्पदांतात् ङमः परस्याचो नित्यं ङमुडागमः स्यात्। प्रत्यङ्ङात्मा। सुगण्णीशः। सन्नच्युतः। नश्छव्यप्र

वर्णे दीर्घः। वृद्धिरेचि। रामौ। चुटू। प्रत्ययाद्यौ चुटू इतौ स्तः। इति जस्येत्संज्ञा। न विभक्तौ तुस्माः। विभक्तिस्थास्तवर्गसकारमका
रा इतो न। इति सकारस्य नेत्त्वं। पूर्वसवर्णदीर्घः। रामाः। एकवचनं संबुद्धिः। संबोधने प्रथमाया एकवचनं संबुद्धिसंज्ञं स्यात्। यस्
मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गं। यः प्रत्ययो यस्मात्क्रियते तदादि शब्दरूपं तस्मिन्प्रत्यये अंगसंज्ञं स्यात्। एङ्ह्रस्वात्संबुद्धेः। एङंताद्ध्रस्वांता
च्चांगाद्धल्लुप्यते संबुद्धिश्चेत्। हे राम। हे रामौ। हे रामाः। अमि पूर्वः। अकोम्यचि परतः पूर्वरूपमेकादेशः स्यात्। रामं। रामौ। लशक्व
तद्धिते। तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः। इति शस्येत्संज्ञा। तस्माच्छसो नः पुंसि। पूर्वसवर्णदीर्घात्परो यः शसः सका
रस्तस्य नः स्यात्पुंसि। अट्कुप्वाङ्नुम्व्यवायेपि। अट्कवर्गपवर्गाङ्नुम् एतैर्व्यस्तैः समस्तैश्च व्यवधानेपि रषाभ्यां परस्य नस्य
णः स्यात्समानपदे। इति णत्वे प्राप्ते। पदांतस्य। पदांतस्य नस्य णत्वं न स्यात्। रामान्। टाङसिङसामिनात्स्याः। अकारांतादंगा
त्टादीनां क्रमादिनादय आदेशाः स्युः। णत्वं। रामेण। सुपि च। यञादौ सुपि परे तोंगस्य दीर्घः स्यात्। रामाभ्यां। अतो भिस ऐस्
स्। अकारांतादंगाद्भिस ऐस् स्यात्। अनेकाल्त्वात्सर्वादेशः। रामैः। ङेर्यः। अतोंगात्परस्य ङे इत्यस्य यादेशः स्यात्। रामाय।
रामाभ्यां। बहुवचने झल्येत्। झलादौ बहुवचने परे तोगस्य एकारः स्यात्। रामेभ्यः। रामात्। रामाभ्यां। रामेभ्यः। रामस्य। ओ

सिं·को·सं
५
5

सिवा। ओसि परतो तोंगस्यैकारः स्यात्। रामयोः। ह्रस्वनद्यापो नुट्। ह्रस्वांतान्नद्यंतादाबंताच्चांगात्परस्यामो नुडागमः स्यात्।
नामि। नामि परे अंतांगस्य दीर्घः स्यात्। रामाणां। रामे। रामयोः। सुपि एत्वे कृते। आदेशप्रत्यययोः। इण्कवर्गाभ्यां परस्यापदांत-
स्यादेशः प्रत्यययोरवयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। रामेषु। एवं कृष्णमुकुंदादयः॥ सर्वादीनि सर्वनामानि। सर्वादी-
नि शब्दरूपाणि सर्वनामसंज्ञानि स्युः। जसः शी। अदंतात्सर्वनाम्नः परस्य जसः शी स्यात्। सर्वे। सर्वनाम्नः स्मै। अतः सर्वनाम्नो ङे इ-
त्यस्य स्मै स्यात्। सर्वस्मै। ङसिङ्योः स्मात्स्मिनौ। अतः सर्वनाम्न एतयोरेतौ स्तः। सर्वस्मात्। आमि सर्वनाम्नः सुट्। अवर्णांतात्सर्व-
नाम्नो विहितस्यामः सुडागमः स्यात्। एत्वषत्वे। सर्वेषां। सर्वस्मिन्। शेषं रामवत्। एवं विश्वादयोप्यदंताः। सर्व। विश्व। उभ। उभय। डतर।
डतम। अन्य। अन्यतर। इतर। त्वत्। त्व। नेम। सम। सिम। पूर्व। पर। अवर। दक्षिण। उत्तर। अपर। अधर। स्व। अंतर। त्यद्। तद्। यद्। एत-
द्। इदम्। अदस्। एक। द्वि। युष्मद्। अस्मद्। भवतु। किं। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां। एतेषां जसि
वा सर्वनामसंज्ञा। पूर्वे पूर्वाः॥ इत्यादि। स्वमज्ञातिधनाख्यायां। स्वशब्दस्य जसि वा सर्वनामसंज्ञा। स्वे स्वाः॥ अंतरं बहिर्योगोपसं- राम
व्यानयोः। अंतरशब्दस्य जसि वा सर्वनामसंज्ञा। अंतरे। अंतराः॥ पूर्वादिभ्यो नवभ्यो वा। एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः। पूर्वस्मा- ५

न्वा। पूर्वात्। पूर्वास्मिन्। पूर्वे। एवं परादीनामपि। शेषं सर्ववत्। प्रथमचरमतयाल्पार्धकतिपयनेमाश्च। एते जसः कार्यं प्र
त्ययकसंज्ञा वा स्युः। प्रथमे। प्रथमाः इत्यादि। शेषं रामवत्। वितायाप्रकरणे तीयस्य ङि·त्सूपसंख्यानं। द्वितीयस्मै। द्वितीया
य। एवं तृतीयः। पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु। पाद दन्त नासिका मास हृदय नि
शा असृज् यूष दोष यकृत् शकृत् उदक आस्य एषां पदादय आदेशाः स्युः शसादौ वा। पादः। पादौ। पादाः। पादं। पादौ। पदः।
पादान्। पदा। पादेनेत्यादि। सुडनपुंसकस्य। सुट् प्रत्याहारः। स्वादि पंचवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य।
स्वादिष्वसर्वनामस्थाने। कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्। यचि भं। यकारादिष्वजादिषु च
स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्। आकडारादेका संज्ञा। इत ऊर्ध्वं कडारोः कर्मधारय इत्यतः प्रागेकस्यैकै
व संज्ञा ज्ञेया। या परानवकाशा च। तेन शसादावचि भसंज्ञैव न पदत्वं। अतो जश्त्वं नादतः। दता। जश्त्वं। दद्भ्याम्। इत्यादि। मा
सः। मासा। स्मामिरुत्वे यत्वे वयलोपः। मास्भ्यामित्यादि। अल्लोपोनः। अंगावयवो सर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याका

सि॰ कौ॰ ६

6

रस्य लोपः स्यात्। रषाभ्यां नो णः समानपदे। एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्। पूष्णः। पूष्णा। नलोपः प्रा
तिपदिकांतस्य। प्रातिपदिकसंज्ञं यत्पदं तदंतस्य नकारस्य लोपः स्यात्। नलोपस्यासिद्धत्वाद्दीर्घत्वमेत्वमैश्च न। पूषभ्यां। पूष
भिः। पूषसु इत्यादि। विभाषा ङिश्योः। अंगावयवोऽसर्वनामस्थानपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः। पूष्णि
पूषणि। पद्दे रामवत्। विश्वपाः। विश्वपौ। विश्वपाः। विश्वपा। विश्वपे। आतो धातोः। आकारांतो यो धातुस्तदंतस्य भस्यांगस्य
लोपः स्यात्। अलोंत्यस्य। विश्वपः। विश्वपा। विश्वपाभ्यामित्यादि। एवं शंखध्मादयः। हरिः। प्रथमयोः पूर्वसवर्णः। हरी। जसि च।
ह्रस्वांतस्यांगस्य गुणः स्यात् जसि परे। हरयः। ह्रस्वस्य गुणः। ह्रस्वस्य गुणः स्यात् संबुद्धौ। एङ्ह्रस्वादिति संबुद्धिलोपः। हे
हरे। हरिं। हरी। हरीन्। शेषो घ्यसखि। अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदंतं सखिवर्जं घिसंज्ञं स्यात्। आङो नास्त्रियां। घेः
परस्याङो ना स्यादस्त्रियां। आङिति टासंज्ञा। हरिणा। घेर्ङिति। घिसंज्ञस्य ङिति सुपि गुणः स्यात्। हरये। घेर्ङितीति
गुणे कृते। ङसिङसोश्च। एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्। हरेः। २। हर्योः। हरीणां। अच्च घेः। इदुद्भ्यामुत्तर

राम ६

स्युङेः रौत्स्यात्॥ घेरन्तादेशश्चाकारः॥ हरौ। हर्योः। हरिषु। एवंश्रीपत्यग्निरविकव्यादयः॥ अनङ्सौ। सख्युरंगस्यानङ् स्याद्
संबुद्धौ सौ परे॥ ङिच्च॥ ङित्ययं तादेशः॥ अलोंत्यात्पूर्व उपधा॥ अंत्यादलः पूर्वो वर्ण उपधासंज्ञः स्यात्॥ सर्वनामस्थाने चासंबुद्धौ॥
नांतस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे॥ अपृक्त एकाल्प्रत्ययः॥ एकाल्प्रत्ययोऽपृक्तसंज्ञः स्यात्॥ हल्ङ्याब्भ्यो
दीर्घात्सुतिस्यपृक्तं हल्॥ हलंतात्परं दीर्घौ यौ ङ्याप्पौ तदंताच्च परं सुतिसी इत्येतदपृक्तं हल्लुप्यते॥ सखा। हे सखे। सख्युर
संबुद्धौ॥ सख्युरंगात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात्॥ अचो ञ्णिति॥ ञिति णि तिच परे अजंतांगस्य वृद्धिः स्यात्॥
सखायौ। सखायः। सखायं। सखायौ॥ घिसंज्ञाभावान्न तत्कार्यं॥ सख्या। सख्ये। ख्यत्यात्परस्य॥ खितिशब्दाभ्यां खीतीश
ब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरकारस्य उः स्यात्॥ सख्युः॥२॥ औत्॥ इदुद्भ्यां परस्य ङेरौत्स्यात्॥ सख्यौ॥ शेषं ह
रिवत्॥ पतिः समास एव॥ पतिशब्दः समास एव घिसंज्ञः स्यात्॥ पत्या। पत्ये। पत्युः॥२॥ पत्यौ॥ शेषं हरिवत्॥ कतिशब्दो नित्यं ब
हुवचनांतः॥ बहुगणवतुडति संख्या॥ एते संख्यासंज्ञाः स्युः॥ डति च॥ डत्यंता संख्या षट्संज्ञा स्यात्॥ प्रत्ययस्य लुक्श्लुलुपः॥

सि॰ कौ॰
७

लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात्। षड्भ्यो लुक्। षट्संज्ञेभ्यः परयोर्जश्शसोर्लुक् स्यात्। प्रत्ययलोपे प्र
त्ययलक्षणं। प्रत्यये लुप्तेपि तदाश्रितं कार्यं स्यात्। जसि चेति गुणे प्राप्ते। न लुमतांगस्य। लुक्श्लुलुप्शब्दैर्लुप्ते लुमता शब्देन लुप्ते
तदाश्रितकार्यमंगस्य न स्यात्। कति। कति। कतिभिः। कतिभ्यः।२। कतीनां। कतिषु। त्रिशब्दो बहुवचनांतः। त्रयः। त्रीन्। त्रिभिः।
त्रिभ्यः।२। त्रेस्त्रयः। त्रिशब्दस्य त्रयादेशः स्यादामि। त्रयाणां। त्रिषु। द्विशब्दो द्विवचनांतः। त्यदादीनामः। एषामकारोंतादेशः
स्याद्विभक्तौ। द्विपर्यंतानामेवेष्टिः। द्वौ।२। द्वाभ्यां।३। द्वयोः।२। नीः। अचि श्नुधातुभ्रुवां — रियङुवङौ। श्नुप्रत्ययांतस्येवर्णो
वर्णांतधातोर्भ्रू इत्येतस्य चांगस्येयङुवङौ स्तोजादौ प्रत्यये परे। ङिच्चेत्यंतादेशः। आंतरतम्यादेरियङ् ओरुवङ्। नियौ। नियः।
अमि शसि च परत्वादियङ्। नियं। नियः। ङेराम्नद्याम्नीभ्यः। नद्यंतादाबंतान्नीशब्दाच्च ङेराम् स्यात्। नियां। एवं सुश्रीयवक्रीसुधी‖ राम
त्यादयः। सेनानीः। एरनेकाचोसंयोगपूर्वस्य। धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदंतो यो धातुस्तदंतस्यानेकाचोंगस्य यण् ७
स्यादजादौ प्रत्यये परे। सेनान्यौ। अमि शसि च सेनान्यं। सेनान्यः। ङेराम्। सेनान्यां। एवं ग्रामणीप्रधीप्रभृतयः। शंभुर्हरिवत्। एवं विष्णु

वायुभ्रात्रादयः। क्रोष्टुः। क्रोष्टुस्तृजंतेन तुल्यं वर्तते असंबुद्धौ सर्वनामस्थाने परे। अनोङि सर्वनामस्थानयोः। ङौ सर्वनामस्था
ने च परे ऋदंतांगस्य गुणः स्यादिति प्राप्ते। ऋदुशनस्पुरुदंसोनेहसां च। ऋदंतानामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ परे। अप्
त तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम्। अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे। क्रोष्टा। क्रोष्टा
रौ। क्रोष्टारः। क्रोष्टारं। क्रोष्टारौ। क्रोष्टून्। विभाषा तृतीयादिष्वचि। अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्ट्रे। ऋत उत्।
ऋदंतान्ङसिङसोरति परे उकार एकादेशः स्यात्। रपरत्वं। योगातस्य लोपा संयोगांतं यत्पदं तदंतस्य लोपः स्यात् इति सलोपः। रे
फस्य विसर्गः। क्रोष्टुः २। आमि परत्वान्नुम् तृज्वद्भावेप्राप्ते नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन। क्रोष्टूनां। क्रोष्टरि। क्रोष्ट्रोः। पद्दे
हल्लादौ वशंभुवत्। खलपूः। ओः सुपि। धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदंतो यो धातुस्तदंतस्यानेकाचोऽङ्गस्य यण् स्या
दजादौ सुपि। खलप्वौ। खलप्वः। इत्यादि एवं सुल्वादयः। स्वभूः। न भूसुधियोः। एतयोर्यण् न स्यादचि सुपि। स्वभुवौ। स्वभुवः इत्यादि। व
र्षाभ्वश्च। अस्यो वर्णस्य यण् स्यादचि सुपि। वर्षाभ्वौ। वर्षाभ्वः। इत्यादि। धाता। हे धातः। धातारौ। धातारः। ऋवर्णान्नस्य णत्वं वाच्यं ॥

सिं·को·
८
8

श

धातृणां। एवं नप्त्रादयः। पिता। पितरौ। पितरौ। पितरौ। शेषं धातृवत्। एवं जामातृभ्रात्रादयः। ना। नरौ। नरः। हे नः। नृ वा नृ इत्येत
स्य नामि वा दीर्घः स्यात्। नृणां। नृणां। गोतो णित्। गोशब्दात्परसर्वनामस्थानं णित्कार्यकृत्स्यात्। गौः। गावौ। गावः। औतोम्शसोः।
ओकारात् अम्शसोरचि परे आकार एकादेशः स्यात्। गां। गावौ। गाः। गवा। गवे। गोः इत्यादि। ओतो णिदिति वाच्यं। सुद्योः सुद्यावौ। इत्यादि।
रायो हलि। रैशब्दस्याकारोन्तादेशः स्याद्धलि विभक्तौ। अचि त्वायादेशः। राः। रायौ। रायः। रायं। रायौ। रायः। राया। राभ्यामित्यादि। ग्लौः।
ग्लावौ। ग्लावः। ग्लावं। ग्लावौ। ग्लावः। इत्यादि इत्यजन्ताः पुंल्लिंगाः। रमा। औङ आपः। आबन्तादंगात्परस्यौङः शी स्यात्। औङित्यौका
रविभक्तेः संज्ञा। रमे। रमाः। संबुद्धौ च। आप एकारः स्यात्संबुद्धौ। एङ्ह्रस्वात्संबुद्धेः। हे रमे। हे रमे। हे रमाः। रमां। रमे। रमाः। आङ्त्वा
न्नत्वासाबः। आङि चापः। आङि ओसि च परे। आबन्तस्यांगस्यैकारः स्यात्। रमया। रमाभ्यां। रमाभिः। याडापः। आपः परस्य ङिद्व
नस्य याडागमः स्यात्। वृद्धिरेचि। रमायै। सवर्णदीर्घः। रमायाः।२। रमयोः। रमाणां। ङेराम्। रमायां। रमयोः। रमासु। एवं दुर्गांबिकागं
गायमुनादयः। सर्वनाम्नः स्याड्ढ्रस्वश्च। आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः। याडपवादः। सर्वस्यै। सर्वस्याः।२। सर्वा

राम
८

सां। सर्वस्यां। सर्वयोः। सर्वासु। एवं विश्वादयः आवंताः॥ तीयस्य ङित्सूपसंख्यानात्। द्वितीयस्यै। द्वितीयायै। द्वितीयस्याः। द्वितीयायाः।
२ द्वितीयस्यां। द्वितीयायां। शेषं रमावत्। एवं तृतीया। नासिकाया नस्॥ नसः। नसा। नोस्यामित्यादि। पक्षे तु रमावत्। निशाया निश।
निशः। निशा। व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः॥ व्रश्चादीनां सप्तानां छशांतयोश्च षकारोन्तादेशः स्यात् झलि पदान्ते च।
षस्य जश्त्वेन ड्। डः। निड्भ्यां। निड्भिः। सुपि टः सीति पक्षे धुट्। स्वर्त्वे। निट्त्सु। निट्सु। विश्वपाः स्तुवत्। मतिर्हरिवत्। आत्वान्नत्वाभावः।
मतीः। नात्वं न। मत्या। ङिति ह्रस्वश्च। इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गौ ईदूतौ ह्रस्वौ च इउवर्णौ स्त्रियां वा नदीसं
ज्ञौ स्तो ङिति परे। आण् नद्याः। नद्यन्तात् परेषां ङितामाडागमः स्यात्। आटश्च। आटोचि परे वृद्धिरेकादेशः स्यात्। मत्यै। मतये। मत्याः।
मतेः। २। नदीत्वपक्षे औत् इति ङेरौत्वे प्राप्ते इदुद्भ्यां। नदीसंज्ञकास्यामित्युद्भ्यां परस्य ङेः आम् स्यात्। पक्षे अच्च घेः। मत्यां। मतौ। एवं श्रु
तिस्मृत्यादयः। त्रिचतुरोः स्त्रियां तिसृचतसृ। स्त्रीलिंगयोः एतयोः एतावादेशौ स्तो विभक्तौ परतः। अचि र ऋतः। तिसृचतसृ एतयोः ऋकार
स्य रेफादेशः स्यादचि। गुणदीर्घोत्वानामपवादः। तिस्रः। २। तिसृभिः। तिसृभ्यः। २ आमि नुमाविरेति नुट्। न तिसृचतसृ। एतयोर्नामि दीर्घो

सि॰कौ

९

नस्यात्॥ तिसृणां॥ तिसृषु॥ द्वेर्त्वे सत्याः॥ द्वे २ द्वाभ्यां ३ द्वयोः २ गौरी। दीर्घाज्जसि च॥ इचि परे पूर्वसवर्णदीर्घो न स्यात्। गौर्यौ।
गौर्यः। पृ॥ यूस्त्र्याख्यौ नदी॥ ईदूतौ नित्यस्त्रीलिंगौ नदीसंज्ञौ स्तः॥ अंबार्थनद्योर्ह्रस्वः॥ अंबार्थानां नद्यन्तानां च ह्रस्वः स्यात् संबुद्धौ॥ हे
गौरि। हे गौर्यौ। हे गौर्यः४। गौर्यै। गौरीभ्यां२। गौर्यां। गौर्याः। गौरीषु। एवं वाणी नद्यादयः। अङ्युत्वान्न सुलोपः। लक्ष्मीः। शेषं
गौरीवत्। एवं तरीतन्त्र्यादयः। स्त्री। हे स्त्रि। स्त्रियाः॥ स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे। स्त्रियौ। स्त्रियः। वाम्शसोः॥ अमि
शसि च स्त्रिया इयङ् वा स्यात्॥ स्त्रियं। स्त्रीम्। स्त्रियः। स्त्रीः। स्त्रिया। स्त्रियै। स्त्रियाः२। स्त्रियोः। परत्वान्नुट्। स्त्रीणां। स्त्रियोः। स्त्री
षु। श्रीः॥ श्रियौ॥ श्रियः। नेयङुवङ्स्थानावस्त्री॥ इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री। हे श्रीः। श्रियै श्रियै।
श्रियाः॥ श्रियः। वामि॥ इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री। श्रीणां। श्रियां। श्रियां। श्रियि। धामरणीः। एवं ९
तार्धेनुर्मतिवत्। स्त्रियां च॥ स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते। ऋतो ङि॥ ऋदंतस्यो नांतेस्य ङ्गुणो ङीप् स्यात्। स्त्रियां। क्रोष्ट्री। क्रोष्ट्रौ
ष्ट्र्यौ। क्रोष्ट्र्यः। वधूर्गौरीवत्। भ्रूः श्रीवत्। स्वलभूः प्रवत्। स्वंभूरपि। नम्दृस्वसृ्त्रादिभ्यः। षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च ङीप् टापो न

स्त्रा। स्वसातिस्रश्वश्रूननांदा दुहितातथा। याता मातेति सप्तैते स्वस्रादयउदाहृताः। अप्तृन्नि। नति दीर्घः। स्वसा। स्वसारौ।
स्वसारः। मातापि तद्वत्। शसि मातॄः। घोर्गोवित्। ताराः ऽंवत्। इत्यं जंताः स्त्रीलिंगाः। अतोम्। अतोंगात् स्त्रीवात्स्वमोरम् स्यात्। अमि पू
र्वः। ज्ञानम्। एङ्ह्रस्वात् दीतिहल्मात्रलोपः। हे ज्ञान। नपुंसकाच्च। स्त्रीवात्परस्यौङः शीस्यात्। भसंज्ञाया। यस्येति च। भस्येवर्णावर्णयो
र्लोपः स्यादीकारे तद्धिते च परे। इत्यकारलोपे प्राप्ते। औङः श्याप्रतिषेधो वाच्यः। ज्ञाने। जश्शसोः शिः। स्त्रीवादनयोः शिः स्यात्। शि सर्वना
मस्थानं। शि इत्येतदुक्तसंज्ञं स्यात्। नपुंसकस्य झलचः। झलंतस्याजंतस्य च स्त्रीवस्य नुमागमः स्यात्सर्वनामस्थाने परे। उपधादी
र्घः। ज्ञानानि। पुनस्तद्वत्। शेषं रामवत्। एवं धनवनादयः। अद्डुतरादिभ्यः पंचभ्यः। एभ्यः स्त्रीवेभ्यः स्वमोरद्ड्आदेशः स्यात्। टेः। डि
ति परे टेर्लोपः स्यात्। वावसाने। अवसाने झलां चरो वा स्युः। कतरत्। कतरद्। कतरे। कतराणि। हे कतरद्। पुनस्तद्वत्। शेषं पूर्ववत्। एवं क
तमत्। इतरत्। अन्यत्। अन्यतरत्। एकतरात् प्रतिषेधो वक्तव्यः। एकतरम्। पद्दन्निति हृदयोदकास्यानां हृद् उदन् आसन्। नपुंस
कस्य झलचः। हृदि। हृदा। हृद्भ्यामित्यादि। सर्वनामस्थाने वा संबुद्धौ। उदानि। उद्ना। उदस्यामित्यादि। आसानि। आस्ना। आसम्भ्या

सि॰ को॰ १० मित्यादि। ह्रस्वो नपुंसके प्रातिपदिकस्य। क्लीबे प्रातिपदिकस्याजंतस्य ह्रस्वः स्यात्। श्रीपं ज्ञानवत्। स्वमोर्नपुंसकात्। क्लीबा
१० त्स्वमोर्लुक् स्यात्। वारि। इकोचि विभक्तौ। इगंतस्य क्लीबस्य नुमागमः स्यात् अचि विभक्तौ। वारिणी। वारीणि। न लुमतेति निषेधस्या
10 नित्यत्वात्पक्षे संबुद्धिनिमित्तो गुणः। हे वारे। हे वारि। आङो ना। वारिणा। घेर्ङिति इति गुणे प्राप्ते। वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम्
पूर्वविप्रतिषेधेन। वारिणे। वारिणः। वारिणः। वारिणोः। नुमचिरेति नुट्। नामीति दीर्घत्वं। वारीणां। वारिणि। वारिणोः। हलादौ ह
रिवत्। तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य। भाषितपुंस्कमिगंतं क्लीबं पुंवद्वा स्याट्टादावचि। अनादये। अनादिने इत्यादि। शे
षं वारिवत्। अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः। एषामनङ् स्याट्टादावचि। अल्लोपोनः। दध्ना। दध्ने। दध्नः। २। दध्नोः। दध्नि। द राम
धनि। शेषं वारिवत्। एवमस्थिसक्थ्यक्षि। सुधि। सुधिनी। सुधीनि। हे सुधे। हे सुधि। सुधिया। सुधिना। प्रध्या। प्रधिना। मधु। म १०
धुनी। मधूनि। हे मधो। हे मधु। सुल्वा। सुलना। धातृ। धातृणी। धातॄणि। हे धातः। हे धातृ। धात्रा। धातृणा। एवं ज्ञातृकर्त्रादयः। एवं इ
× श्राये। एकाजुत्तरपदे णः। एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकांतनुम्विभक्तिस्थस्य नस्य णत्वं ×
× स्यात्। हं तरसुत्सर्वस्य। श्रीपा। णि। ×

ग्घस्वादेशो। आदिश्यमानेषु ह्रस्वेषु मध्ये एव इगेव स्यात्। प्रघु। प्रघुनी। प्रघूनि। इत्यादि बहुनञ्वत्। प्ररि। प्ररिणी। प्ररीणि। प्ररि-
णा। प्रराभ्यां। प्रराभि। नुमचिरेतिनुट्। नामीति दीर्घः। प्ररीणां। सुनु। सुनुनी। सुनूनि। सुनुनेत्यादि। इत्यजंता नपुंसकलिंगाः। होढः।
हस्य ढः स्यात् झलि पदांते च। एकाचो बशो भष् झषंतस्य स्ध्वोः। धातोरवयवो य एकाच् झषंतस्तदवयवस्य बशः स्थाने भष् स्यात् सकारे
ध्वशब्दे पदांते वा। ४ हल्ङ्याबितिसुलोपः। पदांतत्वाद्धस्य ढः। जश्त्वचर्त्वे। लिट्। लिड्। लिहौ। लिहः। लिड्भ्यामित्यादि। लिट्सु। लि-
ट्त्सु। दादेर्धातोर्घः। दादेर्धातोर्हस्य घः स्यात् झलि पदांते र —श्त्वचर्त्वे। धुक्। धुग्। दुहौ। दुहः। घत्वचर्त्वे। धुक्षु। वा द्रुहमुहष्णुहष्णि- दु
हां। एषां हस्य वा घः स्यात् झलि पदांते वा। ध्रुक्। ध्रुग्। ध्रुट्। ध्रुड्। द्रुहौ। द्रुहः। ध्रुग्भ्यां। ध्रुड्भ्यां। ध्रुक्षु। ध्रुट्सु। ध्रुट्त्सु। चतुरन-
डुहोरामुदात्तः। अनयोराम् स्यात् सर्वनामस्थाने। सावनडुहः। अस्य नुम् स्यात् सौ। हल्ङ्याबिति सुलोपः। संयोगांतस्य लोपस्तस्यासि-
द्धत्वान्नलोपो न। अनड्वान्। अम् सम्बुद्धौ। चतुरनडुहोरम् स्यात् संबुद्धौ। आमोपवादः। हे अनड्वन्। अनड्वाहौ। अनड्वाहः। अनडु-
हः। अनडुहा। वसुस्रंसुध्वंस्वनडुहां दः। सांतवस्वंतस्य स्रसादेश्च दः स्यात् पदांते। अनडुद्भ्यामित्यादि। सहेः साडः सः।

सि॰ कौ
२२

साड्रूपस्य सहेः सस्य मूर्धन्यादेशः स्यात् । तुराषाट् तुराषाड् । तुरासाहौ । तुरासाहः । तुराषाड्भ्यामित्यादि । दिव औत् ।
दिविति प्रातिपदिकस्यौत्स्यात्सौ । सुद्यौः । सुदिवौ । सुदिवः । दिव उत् । दिवोन्तादेश उकारः स्यात्पदान्ते । सुद्युभ्यां । सुद्युभिः ।
चत्वारः । चतुरः । चतुर्भिः । चतुर्भ्यः । चतुर्षु । षट्चतुर्भ्यश्च । षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुडागमः स्यात् । णत्वं द्वि-
त्वाच्चतुर्णां चतुर्षु । कमल्न् । कमलौ । कमलुः । षत्वं । कममत्सु । मो नो धातोः । धातोर्मस्य नः स्यात्पदान्ते । न त्वस्यासिद्ध-
त्वान्नलोपो न । प्रशाम्यतीति प्रशान् । प्रशामौ । प्रशामः । प्रशान्भ्यामित्यादि ॥ किमः कः । किमः कः स्याद्विभक्तौ । कः । कौ ।
के । कं । कौ । कान् । इत्यादि सर्ववत् । इदमो मः । इदमो मः स्यात्सौ । त्यदाद्यत्वापवादः । इदो य् पुंसि । इदम इदः स्थाने अय् स्यात्
सौ पुंसि । सो लोपः । अयं । त्यदाद्यत्वं । अतो गुणे । अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः स्यात् । दश्च । इदमो दस्य
मः स्याद्विभक्तौ । इमौ । इमे । त्यदादेः संबोधनाभावः । अनाप्यकः । अककारस्य इदम इदो न स्यादापि विभक्तौ । आबिति टा
इत्यारभ्य सुपः पकारेण प्रत्याहारः । अनेन । हलि लोपः । अककारस्य इदम इदो लोपः स्यादापि हलादौ । आभ्यां । नेदम

राम
२२

दसोऽस्कोः॥ अककारयोरिदमदसोर्भिस ऐस्न स्यात्। एत्वं। एभिः। अस्मै। हलि लोपः। अस्मै। अस्यां। एभ्यः। अस्मात्। अस्य।
अनयोः। एषां। अस्मिन्। अनयोः। एषु। द्वितीयाटौस्स्वेनः। द्वितीयाटौस्सु परत इदमेतदोरेनादेशः स्यादन्वादेशे। एनं। ए
नौ। एनान्। एनेन। एनयोः। उपधाया दीर्घः। हल्ङ्याब्भ्यादिलोपः। राजा। नङि संबुद्धौ। नस्य लोपो न स्यात् ङौ संबुद्धौ च। हे राजन्। राज
नौ। राजानः। राजानं। राजानौ। अल्लोपोऽनः। श्चुत्वं। जञोर्ज्ञः। राज्ञः। राज्ञा। राजभ्यां। राजभिः। राज्ञे। राज्ञः। २ राज्ञोः। राज्ञां। राज्ञि।
राजनि। प्रतिदिवा। प्रतिदिवानौ। प्रतिदिवानः। स्त्रिविभक्ते अल्लोपे कृते। हलि च। रेफवांतस्य धातोरुपधाया इको दीर्घः स्याद्ध
लि। प्रतिदीव्नः। प्रतिदीव्ना। इत्यादि। यज्वा। यज्वानौ। यज्वानः। न संयोगाद्वमंतात्। वकारमकारान्तसंयोगात्परस्यानोऽका
रस्य लोपो न स्यात्। यज्वनः। यज्वना। यज्वभ्यामित्यादि। ब्रह्मणः। ब्रह्मणा। सौ च। इन्हन्पूषार्यम्णां शौ। एषामुपधाया दीर्घः
स्यादसंबुद्धौ सौ परे। वृत्रहा। त्रौ। हे वृत्रहन्। एकाजुत्तरपदे णः। वृत्रहणौ। वृत्रहणः। वृत्रहणं। वृत्रहणौ। हो हंतेर्ञ्णिन्नेषु। ञि
ति णिति प्रत्यये नकारे च परे हंतेर्हस्य कुत्वं स्यात्। वृत्रघ्नः। वृत्रघ्ना। इत्यादि। एवं शार्ङ्गिन्। यशस्विन्। पूषन्। अर्यमन्॥ प्रश्नि।

सि॰ कौ॰ पूषणि।अर्यम्णि।अर्यमणि।मघवा।मघवानौ।मघवानः।मघवानं।मघवानौ।इग्यणः संप्रसारणम्।यणः स्थानेप्रयु
१२ ज्यमान इक् संप्रसारणसंज्ञः स्यात्।श्वयुवमघोनामतद्धिते।अनंतानां त्रसंज्ञानामेषामतद्धितेपरेसंप्रसारणं स्यात्।संप्र
12 सारणाच्च।संप्रसारणादचि पूर्वरूपमेकादेशः स्यात्।आद्गुणः।मघोनः।मघोना।मघवभ्यामित्यादि।शुनः।शुना।श्व
भ्यामित्यादि।युवन्शब्दस्यो त्वे कृते।न संप्रसारणे संप्रसारणं।संप्रसारणे परतः पूर्वस्य यणः संप्रसारणं न स्यात्।इति यका
रस्य नेत्वं।यूनः।यूना।युवभ्यामित्यादि।अर्वा।हे अर्वन्।अर्वणस्त्रसावनञः।नञा रहितस्यार्वन्नंतस्यांगस्य तृ इत्येतादेशः
स्यात्।न तु सौ।उगिद्चां सर्वनामस्थानेऽधातोः।अधातोरुगितो नलोपिनोंचतेश्च नुमागमः स्यात्।सर्वनामस्थाने परे।अर्व
न्तौ।अर्वंतः।अर्वंतं।अर्वंतौ।अर्वतः।अर्वता।अर्वद्भ्यामित्यादि।पथिमथ्यृभुक्षामात्।एषामाकारोंतादेशः स्यात्सौ। राम
इतोत्सर्वनामस्थाने।पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने परे।थो न्थः।पथिमथोस्थस्य न्थादेशः स्यात्।सर्वनामस्था १२
ने परे।पंथाः।पंथानौ।पंथानः।पंथानं।पंथानौ।भस्य टेर्लोपः।भसंज्ञस्य पथ्यादेष्टेर्लोपः स्यात्।पथः।पथा।पथिभ्यामित्यादि।

एवमप्यमः।। अमुष्मात्ः। ष्णान्ता षट्। षांता नांता च संख्या षट्संज्ञा स्यात्। षड्भ्यो लुक्। पंच।२। पंचभिः। पंचभ्यः।।२।। षट्चतुर्भ्यश्चे
ति नुट्। नोपधायाः। नांतस्योपधाया दीर्घः स्यात् नामि। नलोपः। पंचानां। पंचसु। एवं सप्तन् नवन् दशन्। अष्टाभ्य औश्। कृतवै
कल्पिकाकारादष्टनः परयोर्जश्शसोरौश् स्यात्। अष्टौ। अष्टौ। अष्टन आ विभक्तौ। अष्टन आत्वं स्याद्धलादौ विभक्तौ। अष्टाभिः
अष्टाभ्यः।२। अष्टानां। अष्टासु। आत्वाभावे। अष्ट। अष्ट। अष्टभिरित्यादि पंचवत्। तब् तावः जश्त्वचर्त्वे। भुत्। भुद्। बुधौ। बुधः।
बुधा। भुद्भ्यामित्यादि। भुत्सु। संयोगांतस्य लोपः। खन्। खञ्जौ।। खञ्जः। इत्यादि। व्रश्चेति षत्वं जश्त्वचर्त्वे। राट्। राड्। राजौ। रा
जः। राड्भ्यां। राट्सु। राट्त्सु। एवं विभ्राट् देवेट्। स्कोः संयोगाद्योरंते च। पदांते झलि च परे यः संयोगस्तदाद्योः सकारककारयो
र्लोपः स्यात्। भृट्। भृड्। सस्य श्चुत्वेन शः तस्य जश्त्वेन जः। भृज्जौ। भृज्जः। रात्सस्य। रेफात् संयोगांतस्य सस्यैव लोपो नान्यस्येति नि
यमान्न संयोगांतलोपः। चोः कुः।। चवर्गस्य कवर्गः स्याज्झलि पदांते च। ऊर्क्। ऊर्ग्। ऊर्जौ। ऊर्जः। इत्यादि। त्यदाद्यत्वं पररूपत्वं।
तदोः सः सावनंत्ययोः। त्यदादीनां तकारदकारयोरनंत्ययोः सः स्यात्सौ। स्यः। त्यौ। त्ये। सः। तौ। ते। यः। यौ। ये। एषः। एतौ। एते। अन्वादेशे।

एनं ए एनौ। एनान्। एनेन। एनयोः। ङेः प्रथमयोरम्। युष्मदस्मद्भ्यां परस्य ङे इत्यस्य प्रथमाद्वितीययोश्च अमादेशः स्यात्। त्वा
ह्यो स्मो। युष्मदस्मदोर्मपर्यंतयोस्त्व अह एतावादेशौ स्तः सौ। शेषे लोपः। आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरंत्यस्य
लोपः स्यात्। अतो गुणे। अमि पूर्वः। त्वं। अहं। युवावौ द्विवचने। द्वयोरुक्तौ युष्मदस्मदोर्मपर्यंतयोर्युवावौ स्तो विभक्तौ। प्रथमा
याश्च द्विवचने भाषायां। युष्मदस्मदोराकारोंतादेशः स्यादौ ङि। युवां। आवां। यूयवयौ जसि। यूयं। वयं। त्वमावेकवचने। एक
स्योक्तौ युष्मदस्मदोर्मपर्यंतयोस्त्वमौ स्तः। द्वितीयायां च। युष्मदस्मदोराकारोंतादेशः स्याद्द्वितीयायां। त्वां। मां। युवां। आवां। श
सो न्। युष्मदस्मद्भ्यां परस्य शसो नकारः स्यात् अमोपवादः। आदेः परस्य। संयोगांतस्य लोपः। युष्मान्। अस्मान्। योऽचि। युष्मदस्म
दोर्यकारांतादेशः स्यादनादेशेऽजादौ। त्वया। मया। युष्मदस्मदोरनादेशे। अनयोराकारोंतादेशः स्यादनादेशे हलादौ। युवाभ्यां।
आवाभ्यां। युष्माभिः। अस्माभिः। तुभ्यमह्यौ ङयि। अनयोर्मपर्यंतयोस्तुभ्यमह्यौ स्तो ङयि। अमादेशः। शेषे लोपः। तुभ्यं मह्यं। युवा 
भ्यां। आवाभ्यां। भ्यसोऽभ्यम्। युष्मदस्मद्भ्यां परस्य भ्यसोऽभ्यम् स्यात्। युष्मभ्यं। अस्मभ्यं। एकवचनस्य च। आभ्यां पंचम्येकवचनेन स्या 

त्स्मात्। त्वत्। मत्। युवाभ्यां। आवाभ्यां। पंचम्या अत्। आसां पंचम्या स्यसोत्स्यात्। युष्मत्। अस्मत्। तव मम ङसि। अनयोर्मप
र्यंतयोस्तव ममौ ङसि। युष्मदस्मद्भ्यां ङसोश्। तव। मम। युवयोः। आवयोः। साम आकं। आसां परस्याम आकं स्यात्। यु
ष्माकं। अस्माकं। त्वयि। मयि। युवयोः। आवयोः। युष्मासु। अस्मासु। युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ। बहुवच
नस्य वस्नसौ। तेमयावेकवचनस्य। त्वामौ द्वितीयायाः। श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः। स्वामी ते मेपि स हरिः। पातु वाम
पि नौ विभुः॥ १॥ सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः। सोव्याद्वो नः शिवं वो नो दद्यात्सेव्योत्र वः स नः॥ २॥ सुपात्। सुपाद्। सुपा
दौ। सुपादः। सुपादं। सुपादौ। पादः पत्। पाच्छब्दांतं यदं[illegible]गतसंज्ञं तस्यावयवस्य पाच्छब्दस्य पदादेशः स्यात्। सुपदः। सुपदा। सुपाद्भ्यामि
त्यादि। अग्निमत्। अग्निमद्। अग्निमथौ। अग्निमथः। अग्निमद्भ्यामित्यादि। [illegible]। पयोमुक्। पयोमुग्। पयोमुचौ। पयोमुचः। अथे
तिकत्वं। हलोरिति सलोपः। जश्च वर्वौ। सुहृद्। सुहृद्। सुहृद्भ्यां। सुहृत्सु। सुहृद् ~ सु॥ उगिदचां नुम्। सांतमहतः संयोगस्य। सांत
संयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे। महान्। महान्तौ। महान्तः। हे महन्। महतः। महता।

सि॰ को॰
१४
१५

महद्भ्यामित्यादि। अत्वसन्तस्य चाधातोः। अत्वंतस्य धातुभिन्नासंतस्य च दीर्घः स्यादसंबुद्धौ सौ परे। आदौ दीर्घस्ततो नुम्। धीमा
न्। धीमन्तौ। धीमन्तः। हे धीमन्। शसादौ महद्वत्। एवं गोमत्प्रभृतयः। जक्षित्यादयः षट्। षड्धातवोन्ये जक्षितिश्च सप्तम एते
अभ्यस्तसंज्ञाः स्युः। नाभ्यस्ताच्छतुः। अभ्यस्तात्परस्य शतुर्नुम् न स्यात्। जक्षत्। जक्षतौ। जक्षतः। एवं जाग्रत्। दरिद्रत्। शासत्। चकासत्।
दीध्यत्। वेव्यत्। गुप्। गुब्। गुपौ। गुपः। व्रश्चेति षत्वं। जश्त्वचर्त्वे। विट्। विड्। विशौ। विशः। नशेर्वा। नशेः कवर्गोन्तादेशो वा स्यात्पदां
ते। अघोषस्य महाप्राणस्य शकारस्य तादृश एव खकारः। जश्त्वचर्त्वे। नक्। नग्। नट्। नड्। नशौ। नशः। नग्भ्यां। नड्भ्यां। रत्नमुट्।
रत्नमुड्। रत्नमुषौ। रत्नमुषः। षट्। षड्। षड्भिः। षड्भ्यः।। २।। षट्चतुर्भ्यश्च। प्रत्यये भाषायां नित्यं। षण्णां। षट्सु। रुत्वं प्रति षत्वस्या
सिद्धत्वात्ससजुषो रुरिति रुत्वं। र्वोरुपधाया दीर्घ इकः। रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात्पदान्ते। पिपठीः। पिपठि
षौ। पिपठिषः। पिपठीर्भ्यां। वा शरीति वा विसर्जनीयः। नुम्विसर्जनीयशर्व्यवायेपि। एतैः प्रत्येकं व्यवायेपि इण्कुभ्यां परस्य ... राम
सस्य मूर्धन्यादेशः स्यात्। ष्टुना ष्टुत्वेन पूर्वस्य षत्वं। पिपठीःषु। पिपठीष्षु। संयोगान्तस्य लोपः। चिकीः। चिकीर्षौ। चिकीर्षः। १४

रोः सुपि। रो रेव सुपि विसर्जनीयो नान्यस्य। विकीर्षुमत्र स्या। सिद्धत्वादुत्त्वविसर्गौ। दोः। दोषौ। दोषः। पद्दन्न इति वा दोषन्। दो
ष्णः। दोषा। दोष्णा। दोषा। स्कोरिति कलोपः। तट्। तड्। तक्षौ। तक्षः। गोरट्। गोरड्। गोरक्षौ। गोरक्षः। सुपीः। सुपिसौ। सुपिसः।
सुपिसा। सुपीर्भ्यां। सुपीःषु। सुपीःषु। सुतूः। सुतुसौ। सुतुसः। विद्वान्। विद्वांसौ। विद्वांसः। हे विद्वन्। विद्वांसं। विद्वांसौ। वसोः
सम्प्रसारणं। वस्वन्तस्य संप्रसारणं स्यात्। पूर्वरूपत्वं षत्वं। विदुषः। विदुषा। वसुस्रंस्विति दत्वं। विद्वद्भ्यामित्यादि। सेदि
वान्। सेदिवांसौ। सेदिवांसः। सेदुषः। सेदुषा। सेदिवद्भ्यामित्यादि। पुंसोसुङ्। सर्वनामस्थाने विवक्षिते। पुमान्। पुमांसौ। पुं
मांसः। हे पुमन्। पुमांसं। पुमांसौ। पुंसः। पुंसा। पुंसां। पुंभिः। पुंसु। ऋदुशनेत्यनङ्। उशना। उशनसौ। उशनसः। अस्य संबु
द्धौ वा। अनङ् नलोपश्च वा वाच्यः। हे उशनन्। हे उशन। हे उशनः। उशनोभ्यामित्यादि। अनेहा। अनेहसौ। अनेहसः। हे अनेहः।
वेधाः। वेधसौ। वेधसः। हे वेधः। वेधोभ्यामित्यादि। अदस औ सुलोपश्च। अदस औकारोंतादेशः स्यात्सोपरे सुलोपश्च। ते
दोः स सौ इति दस्य सः। असौ। त्यदाद्यत्वं। पररूपत्वं। वृद्धिः। अदसो सेर्दादु दो मः। अदसोऽसांतस्य दात्परस्य उदूतौ दस्य मश्च।

सि॰ कौ॰ मु आंतरतम्याद्ध्रस्वव्यंजनयोर्ह्रस्वो दीर्घस्य दीर्घः। अमू। जसः शी। आद्गुणः। एतईद्बहुवचने। अदसो दात्परस्यैतईत्स्याद्दस्य च मो बहु
१५ र्थोक्तौ। अमी। पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक्पश्चादुत्वमत्वे। अमुं। अमू। अमून्। मुत्वे कृते घिसंज्ञायां नाभावः। नमुने। ना तावेक
15 र्तव्ये कृते तस्यासिद्धत्वाण्णौ सिद्धः स्यात्। अमुना। अमूभ्यां। अमीभिः। अमुष्मै। अमूभ्यां। अमीभ्यः। अमुष्मात्। अमूभ्यां। अमीभ्यः। अ
मुष्य। अमुयोः। अमीषां। अमुष्मिन्। अमुयोः। अमीषु। इति हलंताः पुल्लिंगाः। नहो धः। नहो हस्य धः स्याज्झलि पदांते च। उपान
त्। उपानद्। उपानहौ। उपानहः। उपानद्भ्यां। उपानत्सु। द्यौः। दिवौ। दिवः। द्युभ्यां। द्युषु। गीः। गिरौ। गिरः। पूः। पुरौ। पुरः। चतुर
श्चतस्रादेशः। चतस्रः। चतसृणां। किमः कादेशो। अजाद्यतष्टाप्। अजाद्यतष्टाप्। अजादीनामकारांतस्य च टाप्स्या
त्स्त्रियां। का। के। काः। सर्ववत्। यः सौ। इदमो दस्य यः स्यात्सौ। इदमो मः। इयं। त्यदाद्यत्वं। टाप्। दश्चेति मः। इमे। इमाः। अनया। ह राम
लि लोपः। आभ्यां। आभिः। अस्यै। अस्याः।।२।। अनयोः। आसां। अस्यां। अनयोः। आसु। अन्वादेशे। एनां। एने। एनाः। एनया। ए १५
नयोः। त्यदाद्यत्वं। टाप्। स्या। त्ये। त्याः। एवं तद् यद् एतद्। वाक्। वाग्। वाचौ। वाचः। वाग्भ्यां। वाक्षु। अप्शब्दो नित्यं बहुवचनांतः। अ

स्त्रि तिदीर्घः। आपः। आपः। अपो। सि। अपस्सका रः स्यां ऽद्भादौ प्रत्ययेपरो अद्भिः। अद्भ्यः। अपां। अप्सु। त्विट्। त्विड्। त्विषौ। त्विषः।
त्विड्भ्यां। त्विट्सु। सजूः। सजुषौ। सजुषः। सजूर्भ्यां। सजूःषु। पत्वस्या सिद्धत्वाद् दुत्वं। आशीः। आशिषौ। आशिषः। आशीर्भ्यां।
असौ। त्यदाद्यत्वं। टाप्। औङः शी। उत्वमत्वे। अमू। अमूः। अमूं। अमू। अमूः। अमुया। अमुसां। अमुतिः। अमुष्यै। अमूभ्यां। अमूभ्यः।
अमुष्याः। अमूभ्यां। अमूभ्यः। अमुष्याः। अमुयोः। अमूषां। अमुष्यां। अमुयोः। अमूषु। इति हलंताः स्त्रीलिंगाः। स्वमोर्लु
कादत्वं। स्वनडुत्। स्वनडुद्। स्वनडुही। चतुरनडुहोरित्याम्। स्वनडुांहि। पुनस्तद्वत् शेषं द्रवत्। वाः। वारी। अझलंतत्वान्नुम्
मृ। वारि। चत्वारि। नलुमतेति कादेशो न। किं। के। कानि। इदम्। इमे। इमानि। अन्वादेशे नपुंसके एनद्वक्तव्यः। एनत्। एने। एनानि।
एतेन। एनयोः। ॥२॥ ब्रह्म। हे ब्रह्मन्। हे ब्रह्म। ब्रह्मणी। ब्रह्माणि। हन्त्र्यादिति सुलोपः। रोसुपि। अहन्नित्यस्य रेफादेशः स्याद् सु
पि। अहः। विभाषा ङिश्योः। अह्नी। अहनी। अहानि। अहन्। अहन्नित्यस्य रुः स्यात् पदांते। अहोभ्यां। अहोभिः। दंडि। दंडिनी। दंडी

ग्वि

नि। ग्रदि। ग्रविणी। स्रग्वी। णि। वाग्मि। वाग्मिनी। वाग्मीनि। त्यत्। त्यो। त्यानि। तत्। ते। तानि। यत्। ये। यानि। एतत्। एते। एतानि।
अन्वादेशे। एनत्। पङ्कत्। पङ्कती। पङ्कंति। पङ्कनि। त्वायकत्। पकानि। पक्वा। पङ्कता। शक्कत्। शक्कती। शक्कंति। शकानि। शकृ
ता। शकृता। षत्वस्यासिद्धत्वाद्रुत्वं। धनुः। धनुषी। सांतेति दीर्घः। नुम्विसर्जनीयेति षत्वं। धनूंषि। धनुषा। धनुर्भ्यां। एवं चक्षु
र्हविरादयः। पयः। पयसी। पयांसि। पयसा। पयोभ्यामित्यादि। अदः। विभक्तिकार्यं। उत्वमत्वे। अमू। अमूनि। पुनस्तद्वत्। शेषं पु
वत्॥ ॥इति हलंतनपुंसकलिंगाः॥ श्री॥ ॥ ॥ ॥ ॥ ॥ सि ॥ यो त सा र॥

श्रीगणेशाय नमः॥ ४७०